वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥"

इति महानाटके १ अङ्कः ।

सत्यसन्धा, स्त्री, (सत्ये सन्धाभिसन्धिर्यस्याः ।) द्रौपदी। इति शब्दरत्नावली ॥

सत्या, स्त्री, (सत्यमस्त्यस्या इति । सत्य + अच् । टाप् ।) सीता । सा च रामपत्नी । सत्यवती । सा तु व्यासमाता। इति शब्दरत्नावली ॥ दुर्गा । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ (सत्यभामा । सा तु कृष्णपत्नी । यथा, भागवते । १ । १४ । ३७ ।

"यत्पादशुश्रूषणमुख्यकर्म्मणा
सत्यादयो द्व्यष्ट-सहस्रयोषितः ।
निर्ज्जित्य संख्ये त्रिदशांस्तदाशिषो
हरन्ति वज्रायुधवल्लभोचिताः ॥"

तथा च महाभारते । ३ । २३४ । २ ।
"आरुरुक्षू रथं सत्यामाह्वयामास केशवः ॥"

शंयुपत्नी । यथा, महाभारते । ३ । २१८ । ४ ।
"शंयोरप्रतिमा भार्य्या सत्या सत्याय धर्म्मजा ।
अग्निस्तस्य सुतो दीप्तस्तिस्रः कन्याश्च सुव्रताः ॥")

सत्याकृतिः, स्त्री, (सत्यस्य आकृतिः करणम् । "सत्यादशपथे ।" ५ । ४ । ६६ । इति डाच् ।) अवश्यं मयैतत् क्रेतव्यमिति सत्यकरणम् । तत्पर्य्यायः । सत्यङ्कारः २ सत्यापनम् ३ । इत्यमरः ॥

सत्याग्निः, पुं, (सत्यस्य अग्निः ।) अगस्त्यमुनिः । इति शब्दरत्नावली ॥

सत्यानृतं, क्ली, वाणिज्यम् । इत्यमरः किञ्चित् सत्यं किञ्चिदसत्यं सत्यसहितमनृतं वा यत्र । इति भरतः ॥ (यथा, मनुः । ४ । ६ ।
"सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ॥"
सत्यञ्चानृतञ्चेति द्वन्द्वे कृते द्विवचनप्रयोगः स्यात् । यथा, वाजसनेयसंहितायाम् । १९ । ७७ ।
"दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ॥")

सत्यापनं, क्ली, (सत्यस्य करणम् । सत्य + सत्यापपाशेति । ३ । १ । २५ । इति णिच् आपुक् च ततो ल्युट् ।) सत्याकृतिः । इत्यमरः ॥

सत्यापना, स्त्री, (सत्यस्य करणम् । सत्य + सत्यापपाशेति । ३ । १ । २५ । इति णिच् आपुक् च ततो युच् ।) सत्याकृतिः । इत्यमरटीकायां वोपालितः ॥

सत्याद्यः, त्रि, (सत्यस्य वदनम् । वद् + क्यप् ।) सत्यवादी इति शब्दमाला ॥

सत्र, त् ङ क सम्बन्धे । सन्ततौ । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा-आत्म-सक-सेट् ।) दन्त्यवर्गाद्यमध्यः । सन्ततिर्निर्व्वाहक्रियेति भट्टमल्लः । ङ सत्रयते । सत्रापयते प्रतिज्ञां साधुः । सन्ततिर्विस्तारणमिति गोविन्दभट्टः । इति दुर्गादासः ॥

सत्रं, क्ली, (सत्र्यते संतन्यते इति । सत्र + घञ् ।) यज्ञविशेषः । यथा,—

"नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् ।
आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥"

इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥

सत्राजित्, पुं, (सत्रेण आजयति लोकानिति । ता + जि + क्विप् ।) राजविशेषः । स च श्रीकृष्णश्वशुरः । सत्यभामापिता । परे शशिध्वजराजश्च बभूव । इति कल्किपुराणे २७ अध्यायः ॥ (त्रि, सन्ततजयशीलः । यथा, ऋग्वेदे । २ । २१ । १ ।
"सत्राजिते नृजित उर्व्वराजिते ।"
"सत्राजिते सत्रा सन्ततं जयशीलाय ।" इति तद्भाष्ये सायणः ॥)

सत्रिजातकं, क्ली, (त्रिजातकेन सह वर्त्तमानम् ।) मांसव्यञ्जनविशेषः । यथा,—
"मांसं बहुघृते भृष्टं सिक्तं चोष्णाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ।
तदेव घृततक्राढ्यं प्रदिग्धं सत्रिजातकम् ॥"

इति शब्दचन्द्रिका ॥

सत्वरं, क्ली, सह त्वरया वर्त्तते इति । शीघ्रम् । इत्यमरः ॥ (यथा, रामायणे । २ । ३९ । १४ ।
"राजा सत्वरमाहूय व्यापृतं वित्तसञ्चये ।
उवाच देशकालज्ञो निश्चितं सर्व्वतः शुचिः ॥")
तद्वति, त्रि, । इति भरतः ॥ (यथा, मनुः । ९ । ९४ ।
"त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम् त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥")

सत्सारः, पुं, (सन् सारो यस्य ।) वृक्षविशेषः । चित्रकरः । कविः । इति केचित् ॥ उत्तमसारयुक्ते त्रि ॥

सथुत्कारं, क्ली, अम्बुकृतम् । इति हेमचन्द्रः ॥ थुत्कारेण सह वर्त्तमानञ्च ॥

सदंशकः, पुं, (दंशकेन सह वर्त्तमानः ।) कर्कटः । इति राजनिर्घण्टः ॥ दंशयुक्ते, त्रि ॥

सदंशवदनः, पुं, (सदंशं दंशाकारसहितं वदनं यस्य ।) कङ्कपक्षी । इति राजनिर्घण्टः ॥

सदञ्जनं, क्ली, (सत् अञ्जनम् ।) कुसुमाञ्जनम् । यथा,—
"रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम् ।
सदञ्जनञ्च चाक्षुष्यं माक्षिकं धातुमाक्षिकम् ॥"

इति शब्दचन्द्रिका ॥

सदनं, क्ली, (सीदन्त्यत्रेति । सद् + अधिकरणे ल्युट् । गृहम् । इत्यमरः ॥ (यथा, रामायणे । २ । ६४ । ३६ ।
तिष्ठ मा मागमः पुत्त्र यमस्य सदनं प्रति ।
श्वो मया सह गन्तासि जनन्या च समेधितः ॥")
जलम् । इति मेदिनी ॥

सदः, [स्] स्त्री, क्ली, (सीदन्त्यस्यामिति । सद् + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इति असुन् ।) सभा । इत्यमरः ॥ (यथा, हितोपदेशे ॥

विपदि धैर्य्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुची व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥")

सदस्यः, पुं, (सदसि साधुः । सदस् + यत् ।) विधिदर्शी । इत्यमरः ॥ न्यूनातिरिक्ततां विपर्य्यासञ्च परिहर्त्तुं विधिं वेदोक्तयज्ञक्रियाकलापं द्रष्टुं शीलं येषां ते सदस्याः । सदसि साधवः कारका इतिविकारसंघेत्यादिना यः । इति भरतः ॥ तस्य नामान्तरं प्रश्नवक्ता । यथा,—
"एकः कर्म्मनियुक्तः स्यात् द्वितीयस्तन्त्रधारकः ।
तृतीयः प्रश्नकं ब्रूयात्ततः कर्म्म समाचरेत् ॥"
कर्म्मनियुक्तः आचार्य्यः स च ब्रह्माङ्कके होमकर्म्मणि ब्रह्मा । स्वयं होमाकरणे होतापि स्वयं प्रधानकर्म्माकरणे प्रतिनिधिरपि । तन्त्रधारकः पुस्तकधारकः । प्रश्नवक्ता सदस्यः । इति संस्कारतत्त्वम् ॥*॥ सभ्यः । यथा । सभ्याः सदस्याः पार्षदाः सभास्ताराः सभासदः । सामाजिका इत्यादि हेमचन्द्रः ॥

सदा, व्य सर्व्वकालः । सर्व्वदा । इत्यमरः ॥ यथा,
"परोपकारनियतः सदा भव महाजन ।"

इतिविष्णुपुराणम् ॥

सदागतिः, पुं, (सदा सर्व्वदा गतिर्यस्य ।) वायुः । इत्यमरः ॥ (यथा, महाभारते । १ । ७२ । १ ।
"एवमुक्तस्तया शक्रः सन्दिदेश सदागतिम् ।
प्रातिष्ठत तदा काले मेनका वायुना सह ॥)"
सूर्य्यः । निर्व्वाणम् । सदीश्वरः । इति मेदिनी ॥ (सर्व्वदा गमनशीले, त्रि । यथा, महाभारते । ३ । १३३ । २५ ।
"चतुर्विंशतिपर्व्व त्वां षण्णाभि द्वादशप्रधि ।
तत्त्रिषष्टिशतारं वै चक्रं पातु सदागति ॥")

सदाचारः, पुं, (सतां साधूनामाचारः ।) साधूनामाचरणम् । तल्लक्षणादि यथा,—
"सरस्वतीदृशद्वत्योर्देवनद्योर्यदन्तरम् ।
तद्देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां सदाचारः स उच्यते ॥"

इति मनुः ॥*॥

अन्यच्च ।

और्व्व उवाच ।

"सदाचारेषु राजेन्द्र विशेषान् शृणु संप्रति ।
यानवश्यं नृपः कुर्य्यात्तानतः सकलान् शृणु ॥
साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु सदाचारः स उच्यते ॥
आगमेषु पुराणेषु संहितासु यथोदितान् ।
समुद्दिष्टसदाचारांस्तान् गृह्णीयाद्गृहस्थवत् ॥
ऋषीन् यजेद्वेदपाठैर्देवान् होमैस्तु पूजयेत् ।
श्राद्धैः पितॄन् यजेदन्नैर्भूतानि बलिभिस्तथा ॥
मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम् ।
सर्व्वं गृहस्थवत् कुर्य्यात् निषेकाद्यं विधिं तथा ॥
षट्कर्म्मसु नियुञ्जीत राजा विप्रान् समन्ततः ।
तथैव क्षत्रियादीनि स्वे स्वे कर्म्मणि योजयेत् ॥